शास्त्री द्वितीय खण्डस्य कृते (साहित्यम्)
वेणीसंहारनाम नाटकस्य श्लोक व्याख्या ।

"तथाभूतां दृष्ट्वा नृपसदसि पाञ्चालतनयां
वने व्याधैः सार्धं सुचिरमुषितं वल्कलधरैः ।
विराटस्यावासे स्थितमनुचितारम्भनिभृतं
गुरुः खेदं खिन्ने मयि भजति नाद्यापि कुरुषु ॥"

श्लोकोऽयं सप्तम शताब्द्याः उत्तरार्द्धे अष्टम् शताब्द्याः पूर्वार्द्धे च कान्यकुब्ज देशे समुत्पन्नः, योग सौरभ्य, वैष्णव दर्शन छन्दशास्त्र अलङ्कार विषयेषु निष्णातेन वीर रस प्रतिपादने लब्ध प्रतिष्ठितेन महाकविना भट्टनारायणेन विलिखित वेणी संहार नाम नाटकस्य प्रथमाङ्कात् उद्धृतोऽस्ति । श्लोके अस्मिन् कवि उद्देशः कृष्ण कृते भीमसेनस्य उक्तौ कथयति पाण्डवेषु दुर्योधन विरोधिव्यवहारं विलोक्य श्रुत्वा वा ज्येष्ठ भ्राता (युधिष्ठिरः) असहमतो न भवेत्, तदा भीमसेनः कथयति यत् - गुरुः नृपसभायां तथाविधां द्रौपदीं दृष्ट्वा, चिरं व्याधैः सह वने उषितं दृष्ट्वापि मयि खिद्यते, कुरुषु तु अद्यापि खेदं न वहति ।

गुरुः नृपसदसि तथाभूतां पाञ्चाल तनयां दृष्ट्वा, वने वल्कलधरैः व्याधैः सार्धं सुचिरं उषितं (दृष्ट्वा), विराटस्य आवासे अनुचितारम्भ निभृतं स्थितं (दृष्ट्वा) मयि खिन्ने अद्यापि खेदं भजति न कुरुषु ।

तथेति - गुरुः = ज्येष्ठ भ्राता युधिष्ठिरः, नृपसदसि = राज सभायाम्, तथाभूतां = तादृशीं, दुःशासनेन केशगृहीतां कर्षिताम्, पाञ्चालतनयां - पाञ्चालस्य = विराट नृपतेः, तनयां = दुहितरं द्रौपदीम् दृष्ट्वा = अवलोक्य वने = विपिने वल्कलधरैः = चीरधारिभिः (अस्माभिः) व्याधैः = आखेटकैः सार्धं सुचिरं = चिरकालम् उषितं = निवसितं दृष्ट्वा विराटस्य = विराट नृपतेः आवासे = निवासस्थाने अनुचिता - रम्भनिभृतं = अनुपयुक्ततया, एकान्तम् । खिन्ने = खिन्नं = दुःखिते अद्यापि = अवलोक्य मयि = भीमसेने दुःखं प्राप्नोति, कुरुषु = कौरवेषु अद्यापि = अद्यपि खेदं भजति = न करोति - यैः वयं ईदृशीं दशां प्रापिताः इत्याशयः ।

अत्र शिखरिणी वृत्तम् - तद्यथा -
"रसैः रुद्रैश्छिन्ना यमनसभलागः शिखरिणी ।"

इति

उपेन्द्र झा
6/10/20
व्या० प्रा० साहित्य
रा० उ० सं० महावि०
सुरवसेना, शरिया

शास्त्री तृतीय खण्डस्य कृते (साहित्यम्)

अलङ्कार विवेचनम्

सा० द० दर्पण दशम् परिच्छेदः

संसृष्टिरलङ्कारयोः विवेचनम्।

'मिथोऽनपेक्षयैतेषां स्थितिः संसृष्टिरुच्यते।'
पूर्वोऽस्मिन् कक्षायां वर्णितानाम् अनुप्रासोपमादीनाम् अलङ्काराणां परस्परं नैरपेक्ष्येण अवस्थानं संसृष्टिरलङ्कारः। परस्परं पार्थक्येन तिल तण्डुल न्यायेन शोभमानानाम् अलङ्काराणाम् एकस्मिन् पद्ये वाक्ये वा समावेशश्चेत् तदा ~~संसृ~~ संसृष्टिर्नाम अलङ्कार इत्यर्थः।
उदाहरणं यथा-

'देवः पायादपायान्नः स्मेरेन्दीवरलोचनः।
संसारध्वान्तविध्वंसहंसः कंसनिषूदनः॥'

अत्र पायादपायादिति यमकम् 'ध्वान्त विध्वंस' इत्यत्र ध्वयोरनेकधा सकृत साम्यात् छेकानुप्रासः, एवं ध्वंस हंस कंस इत्यत्र अन्त्यानुप्रासः, 'संसार' इत्यादौ वृत्त्यनुप्रासश्च। इत्येतेषां शब्दालङ्काराणां मिथोऽनपेक्षत्वेन अवस्थानात् संसृष्टिः। द्वितीय पादे लुप्तोपमा, द्वितीयार्द्धे च श्रीकृष्णे सूर्यत्वारोपस्य संसारे ध्वान्तारोप कारणमिति अश्लिष्ट शब्दनिबन्धनं केवलं परम्परितरूपकम्। उभयोः यमकानुप्रासयोः उपमारूपकयोश्च शब्दार्थालङ्कारयोः मिथोऽनपेक्षया अवस्थानात् शब्दार्थालङ्कार संसृष्टिः।

उपेन्द्र झा
6|10|20
एसो० प्रो० साहित्य
रा० इ० सं० महावि०
मुरखेला, पूर्णियाँ

शास्त्री प्रथम खण्डस्य कृते (साहित्यम्)

अभिज्ञान शाकुन्तलम् नाम नाटकस्य श्लोक व्याख्या।

नीवाराः शुककोटरार्भक मुख भ्रष्टास्तरूणामधः
प्रस्निग्धाः क्वचिदिङ्गुदीफलभिदः सूच्यन्त एवोपलाः।
विश्वासोपगमादभिन्नगतयः शब्दं सहन्ते मृगा-
स्तोयाधारपथाश्च वल्कलशिखानिष्यन्दरेखाङ्किताः ॥ १

प्रस्तुतोऽयं श्लोकः ईशास्त्री: प्रथमशास्त्रपूर्वां संस्कृतगौर. कविकुल दिवाकरेण, संस्कृत साहित्योदधि पूरणाय अमृतजलदायमानेन महाकविना कालिदासेन विरचितस्य अभिज्ञान शाकुन्तलम् नाम नाटकस्य प्रथमाङ्कात् उद्धृतोऽस्ति। श्लोकेऽस्मिन् मृगमनुसरन् राजा दुष्यन्तः महर्षेः कण्वस्य आश्रमपार्श्वमागतवान् वैखानसेन मृगमारणात् निवारितः तपस्विना च पाविताः सत्कार ग्रहणाय आश्रमं प्रविशन् राजा अकथितोऽपि तपोवन एव अयम् आभोगः तपोवनस्येति ध्रुवं कथयिता आश्रमं वैशिष्ट्यं वर्णयति -

तरूणाम् अधः शुककोटरार्भक मुखभ्रष्टाः नीवाराः, क्वचित् इङ्गुदीफलभिदः प्रस्निग्धाः उपला इव सूच्यन्ते, विश्वासोपगमात् अभिन्नगतयः मृगाः शब्दं सहन्ते, तोयाधारपथाश्च वल्कलशिखानिष्यन्दरेखाङ्किताः सन्ति।

तरूणां = वृक्षाणां अधः = नीचैः शुकाः = पक्षीविशेषाः तेषां ये कोटरार्भकाः = कोटरस्थाः शिशवः तेषां मुखेभ्यः = आननेभ्यः भ्रष्टाः = निपतिताः नीवाराः धान्यविशेषाः सन्ति, क्वचित् = कस्मिंश्चित् स्थाने इङ्गुदी = तापसतरुः तेषां फलानि भिन्दन्ति = विदारयन्ति तैलानिःसारणाय कुर्वन्ति इति, अतएव प्रस्निग्धाः = चिक्कणाः उपलाः = प्रस्तराः एव सूच्यन्ते = प्रकाश्यन्ते। अत्रास्मान् कोऽपि वधिष्यतीति विश्वासोपगमात् = विश्वासलाभात् न = नहि भिन्नाः = परिवर्तिताः गतयः = गमनानि येषां ते अभिन्नगतयः = एकान्तरूपेण गमनशीलाः मृगाः = हरिणकाः शब्दं = ध्वनिं सहन्ते = आकर्णयन्ति, उद्विग्ना नैव भवन्तीति। तोयाधाराः = जलाशयास्तेषां पथाः = मार्गाः जलाशय पन्थानश्च वल्कलानां = तरुत्वचां मुनिवस्त्राणां शिखाः = अग्रभागाः तेभ्यः निष्यन्दाभिः = निःसृताभिः रेखाभिः = जल रेखाभिः अङ्किताः = चिह्निताः सन्ति। कथितोऽपि ज्ञायते एवायमाभोगस्तपोवनस्येति।

अत्र तपोवनस्याभोगे नीवारादीनां हेतुत्वात् काव्यलिङ्गम् — 'हेतोर्वाक्यपदार्थत्वे काव्यलिङ्गं निगद्यते' इति लक्षणात्। किञ्चाश्रमाभोगे नीवारादीनां हेतुत्वात् अनुमानालङ्कारः। आश्रमस्य स्वभाव वर्णनात् स्वभावोक्तिश्चेति काव्यलिङ्गानुमान-स्वभावोक्त्यादीनां सङ्करः। शार्दूलविक्रीडितं वृत्तम् - 'सूर्याश्वैर्मसजास्ततः सगुरवः शार्दूलविक्रीडितम्' इति लक्षणात्।

उपेन्द्र झा
6/10/20
प्रा० प्रो० साहित्य
रा० उ० सं० महावि०
कुटसेरी, पूर्णियाँ